# Samavedaprokta Shiva Stuti

# સામવેદપ્રોક્તા શિવસ્તુતિઃ

## Document Information

Text title : Samavedaprokta Shiva Stuti

File name : sAmavedaproktAshivastutiH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 22| 88-111||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# સામવેદપ્રોક્ત્તા શિવસ્તુતિઃ

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

સામવેદ ઉવાચ

નમો ભવાય રુદ્રાય મોહનાય નમો નમઃ ।
માર્ગીહિમાય શુદ્ધાય ધુન્વતે ચ નમો નમઃ ॥ ૮૮॥

નમો નમસ્તાપસાય તાપસેશાય વૈ નમઃ ।
નમો નમો વિશાલાય શ્રીપુનર્વસવે નમઃ ॥ ૮૯॥

નમઃ શિવાય પારાય સુપારાય નમો નમઃ ।
મહાપારાય પાર્યાય પારદાય નમો નમઃ ॥ ૯૦॥

ધુન્વતે પારવિન્દાય પુરુષાય નમો નમઃ ।
નમઃ સુપુરુષાર્થાય શ્રીમહાપુરુષાય ચ ॥ ૯૧॥

નમોઽન્નાયાન્નપતયે એકાક્ષાયામિતેક્ષિણે ।
નમઃ પ્રતિપદાયાપિ નમઃ પ્રતરિણે સદા ॥ ૯૨॥

નમસ્ત્રિયમ્બકાયાપિ નમસ્તસ્મૈ કપર્દિને ।
નમો બ્રહ્માધિપતયે શ્રીવિષ્ણુપતયે નમઃ ॥ ૯૩॥

નમોઽખિલાધિપતયે વિરૂપાક્ષાય સુન્વતે ।
એક એવ મહારુદ્રઃ સર્વદેવોત્તમો નમઃ ॥ ૯૪॥

ન તસ્માદધિકઃ કોઽપિ સત્યમેવોચ્યતે મયા ।
ન યસ્માદધિકો દેવો દેવદેવાન્મહેશ્વરાત્ ॥ ૯૫॥

સ એવ સર્વદા સેવ્યઃ શ્રીરુદ્રો વિશ્વશાસકઃ ।
વિષ્ણુમુખ્યાઃ સુરાઃ સર્વે શઙ્કરસ્યૈવ કિઙ્કરાઃ ॥ ૯૬॥

ઇન્દ્રોપેન્દ્રપ્રભૃતયઃ સર્વ શઙ્કરકિઙ્કરાઃ ।
શિવમેવાધિક મન્યે દેવદેવોત્તમં પ્રભુમ્ ॥ ૯૭॥

દેવોત્તમાન્મહાદેવાત્કોઽપિ નાસ્ત્યધિકઃ સુરાઃ ।
દેવોત્તમો મહાદેવઃ સર્વદેવનમસ્કૃતઃ ॥ ૯૮॥

સત્યમેતત્પુનઃ સત્યં સત્યમેતન્ન સંશયઃ ।
શિવઃ કલ્યાણનિલયઃ સર્વદેવશિખામણિઃ ॥ ૯૯॥

સત્યમેતત્પુનઃ સત્યં સત્યમેતન્ન સંશયઃ ।
શિવ એવ સદા પૂજ્યો ભુક્તિમુક્તિફલેપ્સુભિઃ ॥ ૧૦૦॥

સત્યમેતત્પુનઃ સત્યં સત્યમેતન્ન સંશયઃ ।
સૃષ્ટિસ્થિતિવિનાશાનાં શિવ એવ હિ કારણમ્ ॥ ૧૦૧॥

સત્યમેતત્પુનઃ સત્યં સત્યમેતન્ન સંશયઃ ।
તસ્મૈ મયા નમસ્કારાઃ કૃતાઃ પૂર્વમઘાપહાઃ ॥ ૧૦૨॥

સર્વવ્યાપીતિ યો જ્ઞેયઃ સોઽનન્ત ઇતિ મન્મહે ।
યોઽનન્ત ઇતિ વિજ્ઞેયસ્સ તાર ઇતિ મન્મહે ॥ ૧૦૩॥

યત્તારમિતિ વિજ્ઞેયં તત્સૂક્ષ્મમિતિ ગીયતે ।
યત્સૂક્ષ્મમિતિ વિજ્ઞેયં તચ્છુક્લમિતિ મન્યતામ્ ॥ ૧૦૪॥

યચ્છુક્લમિતિ વિજ્ઞેયં તદ્ધિ વૈદ્યુતમેવ હિ ।
યદ્વૈદ્યુતં તદેવૈકં પરબ્રહ્મેતિ મન્યતામ્ ॥ ૧૦૫॥

સ એકઃ સર્વભૂતાત્મા સ એકો રુદ્ર ઉચ્યતે ।
સ ઈશાનઃ સ ભગવાન્સ મહેશ્વર ઉચ્યતે ॥ ૧૦૬॥

સ મહાદેવ એવેશઃ સ સદાશિવ ઈર્યતે ।
અદ્વિતીયો વિભુઃ શ્રેષ્ઠઃ સ એકો રુદ્ર ઉચ્યતે ॥ ૧૦૭॥

રુદ્રસ્ત્રિયમ્બકો નાન્યો રુદ્ર ઇત્યભિધીયતે ।
સર્વવ્યાપી ત્રિણયનસ્તસ્માદીશાન ઉચ્યતે ॥ ૧૦૮॥

સ પશ્યત્યખિલાણ્ડાનિ સ્વાત્મસૃષ્ટાનિ સર્વશઃ ।
સૃષ્ટાનિ ચાખિલાણ્ડાનિ સ્વયમેષોઽવતિ પ્રભુઃ ॥ ૧૦૯॥

લોકાન્સઙ્કલ્પયતે સર્વાન્કલ્પાન્તે સ્વેચ્છયા શિવઃ ।
શિવોઽયં વિશ્વતશ્ચક્ષુઃ શિવોઽયં વિશ્વતોમુખઃ ॥ ૧૧૦॥

શિવોઽયં વિશ્વતોબાહુર્વિશ્વતસ્માન્મહેશ્વરઃ ।
તતઃ સર્વં પરિત્યજ્ય પૂજયન્તુ મહેશ્વરમ્ ॥ ૧૧૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સામવેદપ્રોક્તા શિવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૨। ૮૮-૧૧૧॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 22 . 88-111..

Proofread by Ruma Dewan

*Samavedaprokta Shiva Stuti*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*